श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

## UG-11.9- प्रथम सोपान



स्व धाम प्रस्थान को देखो हो रहे श्री कृष्ण तैयार।
उद्धृत किए उद्धव समक्ष अद्भुत अनमोल उद्गार।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**

**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(*ñ)*caiva narottamam**

**devīṃ(m) sarasvatīṃ(m) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**

**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

**nāmasaṅkīrtanaṃ(m) yasya, sarvapāpapraṇāśanam**

**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**

**एकादशः स्कंधः**

**अथनवमोऽध्यायः**

**ŚrīmadBhāgawatamahāpurāṇam**

**Ekādaśḥ skaṃdhaḥ**

**Athānavamo'dhyāyaḥ**

## ब्राह्मण उवाच

परिग्रहो हि दुःखाय, यद् यत्प्रियतमं(न्) नृणाम् ।

अनन्तं(म्) सुखमाप्नोति, तद् विद्वान् यस्त्वकिं(ञ्)चनः ॥ 1॥

**brāhmaṇa uvāca**

**parigraho hi duḥkhāya, yad yatpriyatamaṃ(n) nṛṇām .**

**anantaṃ(m) sukhamāpnoti, tad vidvān yastvakiṃ(ñ)canaḥ .. 1..**

yat+ priyatama**ṃ**(n), sukha + m**ā**p+ noti, yas+ tva+ ki**ṃ**(ñ)cana**ḥ**

सामिषं(ङ्) कुररं(ञ्) जघ्नुर्- बलिनो ये निरामिषाः ।

तदामिषं(म्) परित्यज्य, स सुखं(म्) समविन्दत ॥ 2॥

**sāmiṣaṃ(ṅ) kuraraṃ(ñ) jaghnur- balino ye nirāmiṣāḥ .**

**tadāmiṣaṃ(m) parityajya, sa sukhaṃ(m) samavindata .. 2..**

न मे मानावमानौ स्तो, न चिन्ता गेहपुत्रिणाम् ।

आत्मक्रीड आत्मरतिर्- विचरामीह बालवत् ॥ 3॥

**na me mānāvamānau sto, na cintā gehaputriṇām .**

**ātmakrīḍa ātmaratir - vicarāmīha bālavat .. 3..**

m**ā**n**ā**+ vam**ā**nau, vicar**ā**+ m**ī**ha

द्वावेव चिन्तया मुक्तौ, परमानन्द आप्लुतौ ।

यो विमुग्धो जडो बालो, यो गुणेभ्यः(फ्) परं(ङ्) गतः ॥ 4॥

**dvāveva cintayā muktau, paramānanda āplutau .**

**yo vimugdho jaḍo bālo, yo guṇebhyaḥ(ph) paraṃ(ṅ) gataḥ .. 4..**

क्वचित् कुमारी त्वात्मानं(म्), वृणानान् गृहमागतान् ।

स्वयं(न्) तानर्हयामास, क्वापि यातेषु बन्धुषु ॥ 5॥

**Kvacit kumārī tvātmānaṃ(m), vṛṇānān gṛhamāgatān .**

**svayaṃ(n) tānarhayāmāsa, kvāpi yāteṣu bandhuṣu .. 5..**

tvāt + mānaṃ(m), tānar + hayāmāsa

तेषामभ्यवहारार्थं(म्), शालीन् रहसि पार्थिव ।

अवघ्नन्त्याः(फ्) प्रकोष्ठस्थाश्- चक्रुः(श्) शं(ङ्)खाः(स्) स्वनं(म्) महत् ॥ 6॥

**teṣāmabhyavahārārthaṃ(m), śālīn rahasi pārthiva .**

**avaghnantyāḥ(ph) prakoṣṭhasthāś - cakruḥ(ś) śaṃ(ṅ) khāḥ(s) svanaṃ(m)mahat .. 6..**

teṣāmabhya+ vahārārthaṃ(m), avagh + nantyāḥ(ph), prakoṣṭhas +thāś

सा तज्जुगुप्सितं(म्) मत्वा, महती व्रीडिता ततः ।

बभं(ञ्)जैकैकशः(श्) शं(ङ्)खान्, द्वौ द्वौ पाण्योरशेषयत् ॥ 7॥

**sā tajjugupsitaṃ(m) matvā, mahatī vṛḍitā tataḥ .**

**babhaṃ(ñ)jaikaikaśaḥ(ś) śaṃ(ṅ)khan, dvau dvau pāṇyoraśeṣayat .. 7..**

taj+ jugup + sitaṃ(m), babhaṃ(ñ)+ jaikaikaśaḥ(ś), pāṇyo+ raśeṣayat

उभयोरप्यभूद् घोषो , ह्यवघ्नन्त्याः(स्) स्म शं(ङ्)खयोः ।

तत्राप्येकं(न्) निरभिद- देकस्मान्नाभवद् ध्वनिः ॥ 8॥

**Ubhayorapyabhūd ghoṣo, hyavaghnantyāḥ(s) sma śaṃ(ṅ)khayoḥ .**

**tatrāpyekaṃ(n) nirabhida – dekasmānnābhavad dhvaniḥ .. 8..**

Ubhayo + rapya + bhūd, hyavagh + nantyāḥ(s), dekasmān+ nābhavad

अन्वशिक्षमिमं(न्) तस्या, उपदेशमरिन्दम ।

लोकाननुचरन्नेताँल्- लोकतत्त्वविवित्सया ॥ 9॥

anvaśikṣamimaṃ(n) tasyā, upadeśamarindama .

lokānanucarannetā̐l- lokatattvavivitsayā .. 9..

anva + śikṣa + mimaṃ(n), upade + śama + rindama

lokā + nanucaran + netā̐l- loka + tattva + vivitsayā

वासे बहूनां(ङ्) कलहो, भवेद् वार्ता द्वयोरपि ।

एक एव चरेत्तस्मात्, कुमार्या इव कं(ङ्)कणः ॥ 10॥

vāse bahūnāṃ(ṅ) kalaho, bhaved vārtā dvayorapi .

eka eva carettasmāt, kumāryā iva kaṃ(ṅ)kaṇaḥ .. 10..

dvayo + rapi, caret + tasmāt

मन एकत्र सं(य्)युज्याज्-जितश्वासो जितासनः ।

वैराग्याभ्यासयोगेन, ध्रियमाणमतन्द्रितः ॥ 11॥

mana ekatra saṃ(y)yujyāj- jitaśvāso jitāsanaḥ .

vairāgyābhyāsayogena, dhriyamāṇamatandritaḥ .. 11..

saṃ(y)yu + jyāj, vairagya + bhyā + sayogena, dhriyamāṇa + matandritaḥ

यस्मिन् मनो लब्धपदं(म्) यदेतच्-

छनैः(श्) शनैर्मुं(ञ्)चति कर्मरेणून् ।

सत्त्वेन वृद्धेन रजस्तमश्च,

विधूय निर्वाणमुपैत्यनिन्धनम् ॥ 12॥

yasmin mano labdhapadaṃ(m) yadetac-

chanaiḥ(ś) śanairmuṃ(ñ)cati karmareṇūn .

sattvena vṛddhena rajastamaśca

vidhūya nirvāṇamupaityanindhanam .. 12..

śanair + muṃ(ñ)cati, rajas + tamaśca, nirvā + ṇamupaitya + nindhanam

तदैवमात्मन्यवरुद्धचित्तो,

न वेद किं(ञ्)चिद् बहिरन्तरं(म्) वा ।

यथेषुकारो नृपतिं(म्) व्रजन्त-

मिषौ गतात्मा न ददर्श पार्श्वे ॥ 13॥

**tadaivamātmanyavaruddhacitto**

**na veda kiṃ(ñ)cid bahirantaraṃ(m) vā .**

**yatheṣukāro nṛpatiṃ(m) vrajanta-**

**miṣau gatātmā na dadarśa pārśve .. 13..**

tadai + vamāt + manyavarud + dhacitto, yathe + ṣukāro

एकचार्यनिकेतः(स्) स्या- दप्रमत्तो गुहाशयः ।

अलक्ष्यमाण आचारैर्- मुनिरेकोऽल्पभाषणः ॥ 14॥

**ekacāryaniketaḥ(s) syā - dapramatto guhāśayaḥ .**

**alakṣyamāṇa ācārair- munireko'lpabhāṣaṇaḥ .. 14..**

ekacār + yaniketaḥ(s), munire + ko'lpa + bhāṣaṇaḥ

गृहारम्भोऽतिदुःखाय, विफलश्चाध्रुवात्मनः ।

सर्पः(फ्) परकृतं(म्) वेश्म, प्रविश्य सुखमेधते ॥ 15॥

**gṛhārambho'tiduḥkhāya, viphalaścādhruvātmanaḥ .**

**sarpaḥ(ph) parakṛtaṃ(m) veśma, praviśya sukhamedhate .. 15..**

gṛhā + rambho'ti + duḥkhāya, viphalaś + cādhruvātmanaḥ

एको नारायणो देवः(फ्), पूर्वसृष्टं(म्) स्वमायया ।

सं(व्)हृत्य कालकलया , कल्पान्त इदमीश्वरः ।।16।।

eko nārāyaṇo devaḥ(ph), pūrvasṛṣṭam(m) svamāyayā .

saṃ(v)hṛtya kālakalayā, kalpanta idamīśvaraḥ .. 16..

एक एवाद्वितीयोऽभू- दात्माधारोऽखिलाश्रयः ।

कालेनात्मानुभावेन , साम्यं(न्) नीतासु शक्तिषु ।

सत्त्वादिष्वादिपुरुषः(फ्), प्रधानपुरुषेश्वरः ॥ 17॥

eka evadvitīyo'bhū - datmādhāro'khilaśrayaḥ .

kālenatmānubhāvena, samyaṃ(n) nītāsu śaktiṣu .

sattvādiṣvādipuruṣaḥ(ph), pradhānapuruṣeśvaraḥ .. 17..

evā + dvitīyo'bhū, dātmā + dhāro' + khilāśrayaḥ, kale + nātmā + nubhāvena,

sattvā + diṣvā + dipuruṣaḥ(ph), pradhā + napuruṣeśvaraḥ

परावराणां(म्) परम, आस्ते कैवल्यसं(ञ्)ज्ञितः ।

केवलानुभवानन्द- सन्दोहो निरुपाधिकः ॥ 18॥

parāvarāṇāṃ(m) parama, āste kaivalyasaṃ(ñ)jñitaḥ .

kevalānubhavānanda - sandoho nirupādhikaḥ .. 18..

kaivalya + saṃ(ñ)jñitaḥ, kevalā + nubhavā + nanda

केवलात्मानुभावेन , स्वमायां(न्) त्रिगुणात्मिकाम् ।

सं(ङ्)क्षोभयन् सृजत्यादौ , तया सूत्रमरिन्दम ॥ 19॥

Kevalātmānubhāvena, svamāyāṃ(n) triguṇātmikām .

saṃ(ṅ)kṣobhayan sṛjatyādau, tayā sūtramarindama .. 19..

Kevalātmā + nubhāvena, sutra + marindama

तामाहुस्त्रिगुणव्यक्तिं(म्), सृजन्तीं(म्) विश्वतोमुखम् ।

यस्मिन् प्रोतमिदं(म्) विश्वं(म्), येन सं(व्)सरते पुमान् ॥ 20॥

**tāmāhustriguṇavyaktiṃ(m), sṛjantīṃ(m) viśvatomukham .**

**yasmin protamidaṃ(m) viśvaṃ(m), yena saṃ(v)sarate pumān .. 20..**

tāmā + hustri + guṇa + vyaktiṃ(m)

**यथोर्णनाभिर्हृदया- दूर्णां(म्) सन्तत्य वक्त्रतः ।**

**तया विहृत्य भूयस्तां(ङ्), ग्रसत्येवं(म्) महेश्वरः ॥ 21॥**

**yathorṇanābhirhṛdayā - dūrṇāṃ(m) santatya vaktrataḥ .**

**tayā vihṛtya bhūyastāṃ(ṅ), grasatyevaṃ(m) maheśvaraḥ .. 21..**

yathor + ṇanābhir + hṛdayā, grasat + yevaṃ(m)

**यत्र यत्र मनो देही, धारयेत् सकलं(न्) धिया ।**

**स्नेहाद् द्वेषाद् भयाद् वापि , याति तत्तत्सरूपताम् ॥ 22॥**

**yatra yatra mano dehī, dhārayet sakalaṃ(n) dhiyā .**

**snehād dveṣād bhayād vāpi, yāti tattatsarūpatām .. 22..**

tat + tat +sarūpatām

**कीटः(फ्) पेशस्कृतं(न्) ध्यायन्, कुड्यां(न्) तेन प्रवेशितः ।**

**याति तत्सात्मतां(म्) राजन्, पूर्वरूपमसन्त्यजन् ॥ 23॥**

**kīṭaḥ(ph) peśaskṛtaṃ(n) dhyāyan, kuḍyāṃ(n) tena praveśitaḥ .**

**yāti tatsātmatāṃ(m) rājan, pūrvarūpamasantyajan .. 23..**

tat + sāt + matāṃ(m), pūrvarūpa + masan + tyajan

**एवं(ङ्) गुरुभ्य एतेभ्य, एषा मे शिक्षिता मतिः ।**

**स्वात्मोपशिक्षितां(म्) बुद्धिं(म्), शृणु मे वदतः(फ्) प्रभो ॥ 24॥**

**evaṃ(ṅ) gurubhya etebhya, eṣā me śikṣitā matiḥ .**

**svātmopaśikṣitāṃ(m) buddhiṃ(m), śṛṇu me vadataḥ(ph) prabho .. 24..**

svātmo + paśikṣitāṃ(m)

देहो गुरुर्मम विरक्तिविवेकहेतुर्-

बिभ्रत् स्म सत्त्वनिधनं(म्) सततार्त्युदर्कम् ।

तत्त्वान्यनेन विमृशामि यथा तथापि,

पारक्यमित्यवसितो विचराम्यसं(ङ्)गः ॥ 25॥

**deho gururmama viraktivivekahetur-**

**bibhrat sma sattvanidhanaṃ(m) satatārtyudarkam .**

**tattvānyanena vimṛśāmi yathā tathāpi**

**pārakyamityavasito vicarāmyasaṃ(ṅ)gaḥ .. 25..**

virakti + viveka + hetur,

satatār + tyudar + kam, tattvān + yanena

pārakya + mitya + vasito, vicarām + yasaṃ(ṅ)gaḥ

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्,

पुष्णाति यत्प्रियचिकीर्षुतया वितन्वन् ।

स्वान्ते सकृच्छ्रमवरुद्धधनः(स्) स देहः(स्),

सृष्ट्वास्य बीजमवसीदति वृक्षधर्मा ॥ 26॥

**jāyātmajārthapaśubhṛtyagṛhāptavargān**

**puṣṇāti yatpriyacikīrṣutayā vitanvan .**

**svānte sakṛcchramavaruddhadhanaḥ(s) sa dehaḥ(s)**

**sṛṣṭvāsya bījamavasīdati vṛkṣadharmaḥ .. 26..**

jāyāt + majārtha + paśubhṛtya + gṛhāp + tavargān,

yat + priyacikīr + ṣutayā

sakṛc +chramavarud + dhadhanaḥ(s),

bī + jamavasī + dati

जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा,

शिश्नोऽन्यतस्त्वगुदरं(म्) श्रवणं(ङ्) कुतश्चित् ।

घ्राणोऽन्यतश्चपलदृक् क्व च कर्मशक्तिर्-

बह्व्यः(स्) सपत्न्य इव गेहपतिं(म्) लुनन्ति ॥ 27॥

jihvaikato'mumapakarṣati karhi tarṣā

śiśno'nyatastvagudaraṃ(m) śravaṇaṃ(ṅ) kutaścit .

ghrāṇo'nyataścapaladṛk kva ca karmaśaktir-

bahvyaḥ(s) sapatnya iva gehapatiṃ(m) lunanti .. 27..

jihvai + kato'mu + mapakarṣati,

śiśno'n + yatas + tvagudaraṃ(m)

ghrāṇo'n + yataś + capaladṛk

सृष्ट्वा पुराणि विविधान्यजयाऽऽत्मशक्त्या,

वृक्षान् सरीसृपपशून् खगदं(व्)शमत्स्यान् ।

तैस्तैरतुष्टहृदयः(फ्) पुरुषं(म्) विधाय,

ब्रह्मावलोकधिषणं(म्) मुदमाप देवः ॥ 28॥

sṛṣṭvā purāṇi vividhānyajayā''tmaśaktyā

vṛkṣān sarīsṛpapaśūn khagadaṃ(v)śamatsyān .

taistairatuṣṭahṛdayaḥ(ph) puruṣaṃ(m) vidhāya

brahmāvalokadhiṣaṇaṃ(m) mudamāpa devaḥ .. 28..

vividhān + yajayā''tma + śaktyā,

sarī + sṛpa + paśūn, khaga + daṃ(v)śa + matsyān

taistai + ratuṣṭa + hṛdayaḥ(ph), brahmā + valoka + dhiṣaṇaṃ(m)

लब्ध्वा सुदुर्लभमिदं(म्) बहुसम्भवान्ते,

मानुष्यमर्थदमनित्यमपीह धीरः ।

तूर्णं(म्) यतेत न पतेदनुमृत्यु यावन्-

निःश्रेयसाय विषयः(ख्) खलु सर्वतः(स्) स्यात् ॥ 29॥

**labdhvā sudurlabhamidaṃ(m) bahusambhavānte**

**mānuṣyamarthadamanityamapīha dhīraḥ .**

**tūrṇaṃ(m) yateta na patedanumṛtyu yāvan-**

**niḥśreyasāya viṣayaḥ(kh) khalu sarvataḥ(s) syāt .. 29..**

sudur + labha + midaṃ(m),

bahusam + bhavānte,

mānuṣya + martha +damanit + yamapīha, pate + danu + mṛtyu

एवं(म्) सं(ञ्)जातवैराग्यो, विज्ञानालोक आत्मनि ।

विचरामि महीमेतां(म्), मुक्तसं(ङ्)गोऽनहं(ङ्)कृतिः ॥ 30॥

**evaṃ(m) saṃ(ñ)jātavairāgyo, vijñānāloka ātmani .**

**vicarāmi mahīmetāṃ(m), muktasaṃ(ṅ)go'nahaṃ(ṅ)kṛtiḥ .. 30..**

saṃ(ñ)jāta + vairāgyo,

mukta + saṃ(ṅ)go' + nahaṃ(ṅ) + kṛtiḥ

न ह्येकस्माद् गुरोर्ज्ञानं(म्), सुस्थिरं(म्) स्यात् सुपुष्कलम् ।

ब्रह्मैतदद्वितीयं(म्) वै , गीयते बहुधर्षिभिः ॥ 31॥

**na hyekasmād gurorjñānaṃ(m), susthiraṃ(m) syāt supuṣkalam .**

**brahmaitadadvitīyaṃ(m) vai, gīyate bahudharṣibhiḥ .. 31..**

hye + kasmād, brahmai + tadad + vitīyaṃ(m),

bahudhar + ṣibhiḥ

श्रीभगवानुवाच

इत्युक्त्वा स यदुं(म्) विप्रस्- तमामन्त्र्य गभीरधीः ।

वन्दितोऽभ्यर्थितो राज्ञा , ययौ प्रीतो यथागतम् ॥ 32॥

śrībhagavānuvāca

ityuktvā sa yaduṃ(m) vipras - tamāmantrya gabhīradhīḥ .

vandito'bhyarthito rājñā, yayau prīto yathāgatam .. 32..

vandito'bhyar + thito

अवधूतवचः(श्) श्रुत्वा , पूर्वेषां(न्) नः(स्) स पूर्वजः ।

सर्वसं(ङ्)गविनिर्मुक्तः(स्), समचित्तो बभूव ह ॥ 33॥

avadhūtavacaḥ(ś) śrutvā, pūrveṣāṃ(n) naḥ(s) sa pūrvajaḥ .

sarvasaṃ(ṅ)gavinirmuktaḥ(s), samacitto babhūva ha .. 33..

avadh**ū** **+** tavaca**ḥ**(**ś**), sarvasa**ṃ**(**ṅ**)ga + vinirmukta**ḥ**(s)

इति श्रीमद्भागवते महापुराणे पारमहं(व्)स्यां(म्)

सं(व्)हितायामेकादशस्कन्धे नवमोऽध्यायः ॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(v)syāṃ(m)

saṃ(m)hitāyāṃekādaśāskandhe navamo'dhyāyaḥ ..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|

Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||

Om Shāntih(ś) Shāntih(ś) Shāntih ||